# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**– शास्त्रिप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ५** (New) | **गुणाः** – ७० |
| **विषयः** – नव्यव्याकरणम् | **कोड– CC - 1.1.1** | **समयः** – २ तः ५ |
| **दिनाङ्कः** – १९/१२/२०१८ | **सन्दर्भग्रन्थः**– वैयाकरणसिद्धान्तकौमुदी (भ्वादिप्रकरणम्) | |

---

**प्र–१ अधोनिर्दिष्टप्रश्नेषु द्वयोः सूत्रयोः व्याख्या कार्या ।** १०

१. लिटि धातोरनभ्यासस्य ।

२. तस्थस्थमिपां तान्तन्तामः ।

३. यासुट् परस्मैपदेषूदात्तो ङिच्च ।

**प्र–२ अधोनिर्दिष्टप्रश्नेषु द्वयोः उत्तराणि लिखत ।** १०

१. **विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्** सूत्रं सोदाहरणं व्याख्यात ।

२. **उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।**
**प्रहाराहारसंहारविहारपरिहारवत् ।।** इयं कारिका व्याख्येया ।

३. परस्मैपदसंज्ञा केषां प्रत्ययानां भवति ? सम्बद्धसूत्राणि उल्लिख्य स्पष्टयत ।

**प्र–३ अधोनिर्दिष्टसूत्रेषु द्वयोः सूत्रयोः व्याख्यां करोतु ।** १०

१. गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु ।

२. लिङ्निमित्ते लृङ् क्रियातिपत्तौ ।

३. आम्प्रत्ययावत्कृञो ऽनुप्रयोगस्य ।

**प्र–४ अधोनिर्दिष्टेषु पञ्चानां ससूत्रं साधनिकाः कार्या ।** १०

| | |
|---|---|
| १. बभूविथ | ५. जगाद |
| २. प्रभवाणि | ६. शुन्धति |
| ३. एधिता | ७. बभ्राम |
| ४. ददते | ८. त्रपते |

**प्र–५ अधोनिर्दिष्टसूत्रेषु द्वयोः सूत्रयोः व्याख्यां कुरुत ।** १०

१. अत एकहल्मध्ये ऽनादेशादेर्लिटि ।

२. परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम् ।

३. ऋतो भारद्वाजस्य ।

**प्र-६ अधोनिर्दिष्टेषु पञ्चानां ससूत्रं रूपसिद्धिः कार्या ।** **१०**

१. एधताम्
२. एधध्वम्
३. एधेयाताम्
४. एधेय
५. आनर्द
६. उवोय्व
७. क्षीयात्
८. आतीत्

**प्र-७ अधोनिर्दिष्टप्रश्नेषु दशानामुत्तराणि लिखत ।** **१०**

१. केभ्यो धातुभ्य आत्मनेपदं भवति ?
२. **भवन्ति** इत्यत्र झि-स्थाने अन्तादेशः केन सूत्रेण भवति ?
३. भूधातोः लोटमध्यमपुरुषे हेर्लोपः केन सूत्रेण भवति ?
४. **गातिस्थाधूपाभूभ्यः सिचः परस्मैपदेषु** सूत्रेण किं भवति ?
५. केषु अर्थेषु धातोर्लिङ्लकारो भवति ?
६. वलादेः आर्धधातुकस्य इडागमः केन सूत्रेण क्रियते ?
७. लिङस्तकारथकारयोः सुट् आगमः केन सूत्रेण भवति ?
८. **सवाभ्यां वामौ** इत्यनेन किं भवति ?
९. **सदिरप्रतेः** सूत्रं किं करोति ?
१०.झलः परस्य सस्य लोपः केन सूत्रेण भवति ?
११.तस्मान्नुड्द्विहलः - इति सूत्रेण कः आगमः क्रियते ?
१२.सिचि परे इगन्ताङ्गस्य वृद्धिविधायकं सूत्रं किम् ?
१३.स्पर्श्-धातोः अर्थः कः ?
१४.**सार्वधातुकमपित्** सूत्रेण किं भवति ?
१५.तासस्त्योः सस्य हः केन सूत्रेण भवति ?